# नलोपाख्यानम्

## 14

बृहदश्व उवाच।

उत्सृज्य दमयन्तीं तु नलो राजा विशां पते।
ददर्श दावं दह्यन्तं महान्तं गहने वने॥ ३-६३-१ ॥
तत्र शुश्राव मध्ये ऽग्नौ शब्दं भूतस्य कस्यचित्।
अभिधाव नलेत्युच्चैः पुण्यश्लोकेति चासकृत्॥ ३-६३-२ ॥
मा भैरिति नलश्चोक्त्वा मध्यमग्नेः प्रविश्य तम्।
ददर्श नागराजानं शयानं कुण्डलीकृतम्॥ ३-६३-३ ॥
स नागः प्राञ्जलिर्भूत्वा वेपमानो नलं तदा।
उवाच विद्धि मां राजन्नागं कर्कोटकं नृप॥ ३-६३-४ ॥
मया प्रलब्धो ब्रह्मर्षिरनागाः सुमहातपाः।
तेन मन्युपरीतेन शप्तो ऽस्मि मनुजाधिप॥ ३-६३-५ ॥
तस्य शापान्न शक्नोमि पदाद्विचलितुं पदम्।
उपदेक्ष्यामि ते श्रेयस्त्रातुमर्हति मां भवान्॥ ३-६३-६ ॥
सखा च ते भविष्यामि मत्समो नास्ति पन्नगः।
लघुश्च ते भविष्यामि शीघ्रमादाय गच्छ माम्॥ ३-६३-७ ॥
एवमुक्त्वा स नागेन्द्रो बभूवाङ्गुष्ठमात्रकः।
तं गृहीत्वा नलः प्रायादुद्देशं दाववर्जितम्॥ ३-६३-८ ॥
आकाशदेशमासाद्य विमुक्तं कृष्णवर्त्मना।
उत्स्रष्टुकामं तं नागः पुनः कर्कोटको ऽब्रवीत्॥ ३-६३-९ ॥
पदानि गणयन्गच्छ स्वानि नैषध कानिचित्।
तत्र ते ऽहं महाराज श्रेयो धास्यामि यत्परम्॥ ३-६३-१० ॥
ततः संख्यातुमारब्धमदशद्दशमे पदे।
तस्य दष्टस्य तद्रूपं क्षिप्रमन्तरधीयत॥ ३-६३-११ ॥
स दृष्ट्वा विस्मितस्तस्थावात्मानं विकृतं नलः।
स्वरूपधारिणं नागं ददर्श च महीपतिः॥ ३-६३-१२ ॥
ततः कर्कोटको नागः सान्त्वयन्नलमब्रवीत्।

मया ते ऽन्तर्हितं रूपं न त्वा विद्युर्जना इति॥ ३-६३-१३॥

यत्कृते चासि विकृतो दुःखेन महता नल।

विषेण स मदीयेन त्वयि दुःखं निवत्स्यति॥ ३-६३-१४॥

विषेण संवृतैर्गात्रैर्यावत्त्वां न विमोक्ष्यति।

तावत्त्वयि महाराज दुःखं वै स निवत्स्यति॥ ३-६३-१५॥

अनागा येन निकृतस्त्वमनर्हो जनाधिप।

क्रोधादसूययित्वा तं रक्षा मे भवतः कृता॥ ३-६३-१६॥

न ते भयं नरव्याघ्र दंष्ट्रिभ्यः शत्रुतो ऽपि वा।

ब्रह्मविद्भ्यश्च भविता मत्प्रसादान्नराधिप॥ ३-६३-१७॥

राजन्विषनिमित्ता च न ते पीडा भविष्यति।

संग्रामेषु च राजेन्द्र शश्वज्जयमवाप्स्यसि॥ ३-६३-१८॥

गच्छ राजन्नितः सूतो बाहुको ऽहमिति ब्रुवन्।

समीपमृतुपर्णस्य स हि वेदाक्षनैपुणम्।

अयोध्यां नगरीं रम्यामद्यैव निषधेश्वर॥ ३-६३-१९॥

स ते ऽक्षहृदयं दाता राजाश्वहृदयेन वै।

इक्ष्वाकुकुलजः श्रीमान्मित्रं चैव भविष्यति॥ ३-६३-२०॥

भविष्यसि यदाक्षज्ञः श्रेयसा योक्ष्यसे तदा।

समेष्यसि च दारैस्त्वं मा स्म शोके मनः कृथाः।

राज्येन तनयाभ्यां च सत्यमेतद्ब्रवीमि ते॥ ३-६३-२१॥

स्वरूपं च यदा द्रष्टुमिच्छेथास्त्वं नराधिप।

संस्मर्तव्यस्तदा ते ऽहं वासश्चेदं निवासयेः॥ ३-६३-२२॥

अनेन वाससाच्छन्नः स्वरूपं प्रतिपत्स्यसे।

इत्युक्त्वा प्रददावस्मै दिव्यं वासोयुगं तदा॥ ३-६३-२३॥

एवं नलं समादिश्य वासो दत्त्वा च कौरव।

नागराजस्ततो राजंस्तत्रैवान्तरधीयत॥ ३-६३-२४॥